संस्कृत

स्तोत्र

सं.नं. ७८

नवग्रहस्तोत्र

६९८। स्तो. ९३

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

नवग्रह ॥१॥

श्रीगणेशायनमः॥ अथनवग्रहस्तोत्रप्रारंभः॥ ॐ॥
अस्यश्रीनवग्रहस्तोत्रमंत्रस्य॥ वेदव्यासऋषिः॥ अ स
नुष्टुप्छंदः॥ ममद्वादशाष्टमजन्मस्थअरिष्टनि
रसनार्थंनवग्रहस्तोत्रजपेविनियोगः॥ ॐ॥ जपाकु
सुमसंकाशंकाश्यपेयंमहद्युतिं॥ तमोरिंसर्वपाप
घ्नंप्रणतोस्मिदिवाकरं॥ १॥ दधिशंखतुषाराभं
क्षीरोदार्णवसंभवं॥ नमामिशशिनंसोमंशंभोर्मु ॥१॥

कुटभूषणं॥ २॥ धरणीगर्भसंभूतंविद्युत्कांचनसं
निभं॥ कुमारंशक्तिहस्तंचमंगलंप्रणमाम्यहं॥
३॥ प्रियंगुकलिकाश्यामंरूपेणाप्रतिमंबुधं॥
सौम्यंसौम्यगुणोपेतंतंबुधंप्रणमाम्यहं॥ ४॥ दे
वानांचऋषीणांचगुरुंकांचनसंनिभं॥ वेदनी
यंत्रिलोकानांप्रणमामिबृहस्पतिं॥ ५॥ हेमकुं
दमृणालाभंदैत्यानांपरमंगुरुं॥ सर्वशा

स्त्रप्रवक्तारंभार्गवंप्रणमाम्यहं॥ ६॥ नीलांजनसमा
भासंरविपुत्रंयमाग्रजं॥ छायामार्तंडसंभूतंतंन
मामिशनैश्चरं॥ ७॥ अर्द्धकायंमहावीर्यंचंद्रादित्य
विमर्दनं॥ सिंहिकागर्भसंभूतंतंराहुंप्रणमाम्यहं॥
८॥ पलाशपुष्पसंकाशंतारकाग्रहमस्तकं॥
रौद्रंरौद्रात्मकंघोरंतंकेतुंप्रणमाम्यहं॥ ९॥ इ
तिव्यासमुखंप्रोक्तंयःपठेत्सुसमाहितः॥ दिवा

"Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

वायद्दिवारात्रौतेषांशांतिर्भविष्यति॥१०॥ऐश्वर्य
मतुलंचैवमारोग्यंपुष्टिवर्द्धनं॥नरनारीन्टपाणां
चभवेद्दुस्वप्ननाशनं॥११॥ग्रहनक्षत्रपीडाश्चत
स्कराग्निसमुद्भवाः॥नाःसर्वाःप्रशमंयांतिव्या
सोब्रूतेनसंशयः॥१२॥इतिश्रीव्यासविरचितं
नवग्रहस्तोत्रंसंपूर्णं॥श्रीनवग्रहार्पणमस्तु॥
रवि॥चंद्र॥मंगळ॥बुध॥गुरु॥शुक्र॥शनि॥राहु॥केतु॥
७०००॥११०००॥१०००॥४०००॥१९०००॥१६०००॥२३०००॥१८०००॥१७०००

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com